## तुमुनण्वुलौ क्रियायां क्रियार्थायाम्। (१०/३१७७)

भविष्यति इत्येव। क्रियार्थायां [1]क्रियायामुपपदे [2]धातोर्भविष्यति काले तुमुन्ण्वुलौ प्रत्ययौ भवतः। भोक्तुं व्रजति। भोजको व्रजति। भुजिक्रियार्थः व्रजिरत्रोपपदम्। क्रियायाम् इति किम्? भिक्षिष्य इत्यस्य जटाः। क्रियार्थायाम् इति किम्? धावतस्ते पतिष्यति दण्डः।

अथ [3]किमर्थं ण्वुल् विधीयते यावता 'ण्वुल्तृचौ' (३.१.१३३/२८९५) इति सामान्येन विहित एव सोऽस्मिन्नपि[4] विषये भविष्यति? [5]लृटा क्रियार्थोपपदेन बाध्येत। वाऽसरूपविधिना सोऽपि भविष्यति? एवं तर्हि एतद् [6]ज्ञाप्यते, क्रियायामुपपदे क्रियार्थायां वाऽसरूपेण तृजादयो न भवन्ति इति। तेन कर्ता व्रजति, विक्षिपो व्रजति इत्येवमादि[7] निवर्त्यते॥

## भाववचनाश्च। (११/३१८०)

[8]भविष्यति इत्येव। 'भावे' (३.३.१८/३१८४) इति[9] प्रकृत्य ये घञादयो [10]विहितास्ते च भाववचनाः भविष्यति काले क्रियायामुपपदे क्रियार्थायां भवन्ति। किमर्थमिदं [11]यावता विहिता एव ते? [12]क्रियार्थोपपदे विहितेन अस्मिन् विषये तुमुना [13]बाध्येरन्। वाऽसरूपविधिश्चात्र नास्ति इत्युक्तम्। अथ [14]वचनग्रहणं किमर्थम्? वाचका यथा स्युः। कथं [15]च वाचका [16]भवन्ति? याभ्यः प्रकृतिभ्यो येन [17]विशेषणेन विहिता यदि [18]ताभ्यस्तथैव भवन्ति, [19]नासामञ्जस्येन इति। पाकाय व्रजति। [20]भूतये व्रजति। [21]पुष्टये व्रजति॥

## अण् कर्मणि च। (१२/३१८१)

भविष्यति इत्येव। [22]चकारः सन्नियोगार्थः। [23]धातोः अण् प्रत्ययो भवति [24]भविष्यति काले कर्मण्युपपदे क्रियायां च क्रियार्थायाम्। 'कर्मण्यण्' (३.२.१/२९१३) इति सामान्येन [25]विहितो वाऽसरूपविधेरभावाद् ण्वुला बाधितः पुनरण्[26] विधीयते, [27]सोऽपवादत्वाद् ण्वुलं बाधते, परत्वात्[28] कादीन्। तेन अपवादविषयेऽपि भवत्येव। काण्डलावो व्रजति[29]। अश्वदायो [30]व्रजति। [31]गोदायो व्रजति। कम्बलदायो व्रजति॥

## लृट् शेषे च। (१३/२१०३)

भविष्यति [32]इत्येव। शेषः क्रियार्थोपपदादन्यः। शेषे शुद्धे भविष्यति काले, चकारात् क्रियायां च उपपदे क्रियार्थायां [33]धातोः लृट् प्रत्ययो भवति। करिष्यामि इति व्रजति। हरिष्यामि इति व्रजति। [34]शेषे खल्वपि – करिष्यति। हरिष्यति॥

---

1. क्रियायां नास्ति फ. 2. धातौ ह. 3. ण्वुल्ग्रहणं किमर्थम् फ. 4. अपि नास्ति फ. 5. विहितेन इत्यधिकम् फ. 6. अनेन इत्यधिकम् ब. 7. आदीनि निर्वर्त्यन्ते ह, निवर्तते ब. 8. वाक्यमिदं नास्ति फ. 9. वक्तव्ये इत्यधिकम् फ. 10. प्रत्ययाः इत्यधिकम् ह, विधीयन्ते फ. 11. उच्यते इत्यधिकम् ब. क. 12. क्रियार्थोपपदेन क, क्रियार्थोपपदविहितेन ब, विहितेन नास्ति ड. 13. बाध्यते ह, वाच्येरन् क, बाध्यन्ते ड. 14. वचनं फ. 15. ते क. ड. ह. 16. भवन्ति नास्ति फ. 17. विशेषणेनैव फ, ते ब. ह. 18. ताभ्याम् ह. फ. 19. नासमञ्जस्येन इति ड, इति नास्ति क. फ. 20. त्यागाय अ. ब. क. फ. ह, संपत्तये ड. 21. प्लुष्टये ह, मुष्टये व्रजति क. 22. चकारः नास्ति फ. 23. धातोः नास्ति फ. ह. 24. भविष्यति काले नास्ति ह. फ. 25. विहितोऽप्यण् अ. ब. क. 26. प्रत्ययः इत्यधिकम् फ. 27. सोपधत्वात् अ. ब. क. 28. च इत्यधिकम् अ. ब. क. ह. 29. शरलावो व्रजति इत्यधिकम् ब. क. ड. फ. ह. 30. भवति फ. 31. उदाहरणमिदं नास्ति फ. 32. इत्यनुवर्तते अ. 33. वर्तमानात् इत्यधिकम् ब. 34. शेषः फ, शुद्धे क.